# भारतीयज्ञानसंपोषणकेन्द्रम् – 02

## भारतीयज्ञानपरम्पराकेन्द्रप्रस्तावकार्यक्रमः 2022-23

## आवेदनपत्रं निर्देशश्च


स्पर्धात्मकस्य कार्यक्रमस्य अवलोकनम् पृष्ठसंख्या 03

परियोजनाप्रस्तावस्य सिद्धता पात्रता च पृष्ठसंख्या 05

श्रेणीमानदण्डः पृष्ठसंख्या 10

परियोजनाप्रस्तावमार्गदर्शनम् पृष्ठसंख्या 11

परियोजनाप्रस्तावस्य स्वरूपम् पृष्ठसंख्या 15


प्रस्तावस्य आवेदनाय अन्तर्जालः – iksindia.org

## स्मर्तव्याः तिथयः

प्रस्तावसमर्पणघोषणा – 2022वर्षस्य अगस्तमासस्य 31दिनाङ्कः

प्रस्तावसमर्पणम् - 2022वर्षस्य सप्तम्बरमासस्य 30दिनाङ्कः

चितानाम् प्रस्तावानाम् उद्घोषणा – 2022 वर्षस्य नवम्बरमासान्ते

धनराशेः उपलब्धिः – 2022वर्षस्य दिसम्बरमासस्य मध्यभागे

प्रगतेः प्रतिवेदनसमर्पणम् – 2022/2024वर्षस्य जुलैमासस्य प्रथमदिनाङ्कः एवं दिसम्बरमासस्य31दिनाङ्कः

परियोजनायाः समीक्षा – 2023वर्षस्य दिसम्बरमासे

परियोजनायाः अन्तिमप्रतिवेदनस्य समर्पणम् – 2024 वर्षस्य 31दिनाङ्कः


संपर्कसूत्रम् : ईमेलः iksresearch@aicte-india.org दूरवाणीसंख्या: 011 29581523


प्रस्तावस्य समर्पणाय अन्तर्जालः : https://iksindia.org/iks-center-form.php

## भारतीयज्ञानपरम्पराविभागः

विश्वस्य अतिप्राचीनायाः जीवितायाः संस्कृतेः आलयः ज्ञातेषु इतिहासेषु ज्ञानस्य शक्तिकेन्द्रं ;च भारतद्वीपः विद्यते। मानवतायाः सर्वेषाम् आयामानां सम्वर्धिका अत्रत्या धार्मिकसंस्कृतिः परिवारेण परिसरेण विश्वेन च सह सामरस्यजीवनं यापयितुं प्रेरयति। आधुनिकप्रतिमानाः अस्थिरयुताः परिसरेण सह संघर्षयन्ति इति विश्वे अधुना जायमानाभिः घटनाभिः विज्ञायते। आधुनिकजगति वर्धमानाः असमानताः विकासस्य नवीनप्रतिमानानाम् अधिकाम् आवश्यकतां सूचयन्ति।

किन्तु भारतीयज्ञानमार्गः स्थिरयुक्तः सर्वेषां कल्याणाय प्रयतते।एआईसीटीईस्थस्य शिक्षामन्त्रालयस्य ज्ञानपरम्पराविभागस्य भव्यं लक्ष्यं विद्यते यत् विश्वं प्रति भारतीयज्ञानमार्गप्रदर्शकानां विदुषां प्रशिक्षणम्। यदि वयम् अस्मिन् शतके ज्ञानोन्नायकाः विश्वगुरुः च भवितुम् इच्छामः तर्हि अस्माकं ज्ञानपरम्परायाः उज्जीवनं तथा संपूर्णं विश्वं प्रति भारतीयज्ञानपद्धितिमश्रित्य कार्यं कर्तुं भारतीयज्ञानमार्गस्य प्रदर्शनम् अत्यपेक्षितम् । **अतः भारतीयज्ञानपरम्परायाः सर्वेषु अंशेषु अन्तःसम्बन्धिविषयाणाम् अन्तःसम्बन्धिशोधविषयाणां च प्रोत्साहनार्थं तथा नवाचारस्य समावेशार्थं तत्समाजेषु समायोजनार्थम् एआईसीटीई मध्ये भारतसर्वकारस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागः संस्थापितो विद्यते।**

<u>भारतीयज्ञानपरम्पराविभागस्य कार्याणि</u>

1. विश्वविद्यालयैः राष्ट्रियमहत्त्वपूर्णसंस्थानैः, अनुसन्धानविकासप्रयोगशालाभिः, विभिन्नमन्त्रालयैः च सह भारते अथवा विदेशेषु विभिन्नाभिः संस्थाभिः च कृतानां भारतीयज्ञानपरम्पराधारितानां तत्संबद्धानां च अन्तर्विषयककार्याणां प्रोत्साहनं समन्वयनं च तथा सार्वजनिकक्षेत्रेषु वर्तमानानां संस्थानां कृते अत्र संयुनक्तुं प्रेरणाप्रदानम् ।
2. संस्थानां केन्द्राणाम् अनुसन्धातृणां च समावेशं कुर्वत् विषयानुगुणम् अन्तःसम्बन्धिविषयेषु अनुसन्धानकर्तृसमूहस्य निर्माणम्, मार्गदर्शनम्,निरीक्षणं च।
3. लोकोपयोगिनां योजनानां निर्माणं प्रचारश्च।
4. विभिन्नपरियोजनानां कृते वित्तसहायः तथा अनुसन्धानार्थं तन्त्रज्ञानस्य विकासः।
5. भारतीयज्ञानपरम्परायाः सम्वर्धनार्थम् अपेक्षितानां नीतीनाम् अनुशंसा।

**भारतीयभाषासमितिः**

भारतसर्वकारस्य शिक्षामन्त्रालयेन भारतीयभाषाणां प्रचाराय प्रसाराय च भारतीयभाषासमितिः इति उच्चकोटिका समितिः आरचिता। राष्ट्रियशिक्षानीतिः 2020 इत्यत्र उक्तानुसारेण भारतीयभाषाणाम् अभिवृद्धये शीघ्रगामिमार्गस्य अन्वेषणार्थं तथा सूचनार्थं च समितिः इयं विद्यते।विद्यामानभाषाणां शिक्षणंम् अनुसन्धानस्य उज्जीवनं, देशस्य विभिन्नसंस्थासु तस्य विस्तारः इत्यादिविषयेषु मन्त्रालयं प्रति सूचनाप्रदानादिकार्याणि इयं समितिः **निर्वर्तयति। एकं भारतं श्रेष्ठं भारतम्** इत्यस्य कृते

हेतुभूतानां नवाचारप्रकोष्ठाः भारतीयज्ञानपरम्परा इत्यादीनां तथा मन्त्रालयस्य छात्रकेन्द्रितोपक्रमाणां समन्वयनं समितेः अत्यावश्यककार्यं विद्यते।

## भारतीयज्ञानपरम्पराविभागकेन्द्रप्रस्तावकार्यक्रमस्य अवलोकनम्

अस्य कार्यक्रमस्य मुख्यम् उद्देश्यं वर्तते यत् भारतीयज्ञानपरम्पराकेन्द्राणां संस्थापनं तथा तानि केन्द्राणि भारतीयज्ञानपरम्पारायाः कृते राष्ट्रियशिक्षानीतिः2020 इत्यस्य राष्ट्रस्तरे कार्यान्वयानाय प्रामाणिकमूलसामग्रीप्रदानम्, पाठ्यक्रमसामग्रीनिर्माणम्, पाठ्यक्रमस्य प्रसारः, नैकभारतीयभाषासु भारतीयज्ञानपरम्पराक्षेत्रसंबद्धनां सामग्रीणां निर्माणम्, इत्यस्य प्रदानार्थं सहायम् आचरन्ति। विभिन्नभारतीयभाषामाध्यमेन द्वितीयस्तरानुसन्धानस्य, शिक्षायाः, औट-रीच-कार्यक्रमाणां च कृते वित्तीयानुदानस्य प्रदानम् अस्य कार्यक्रमस्य मुख्यम् उद्देश्यं विद्यते। यत्र भारतीयभाषाकेन्द्राणि वर्तन्ते तत्र इमानि केन्द्राणि निर्दिष्टे क्षेत्रे भारतीयभाषासु केन्द्रितानि स्युः।

प्राथमिकसंशोधनस्य अपेक्षा नास्ति तथा तादृशप्रस्तावाः अत्र उपयुक्ताः न भवन्ति। राष्ट्रियशिक्षानीतिः-2020 इत्यत्र उद्धृतानां भारतीयज्ञानपरम्पराविषयाणाम् अन्वेषणं विना सामान्यरूपेण केन्द्राणां स्थापनाय आवेदिताः प्रस्तावाः प्रथमचरणे एव निरस्तीक्रियन्ते। भाविविदुषां निर्माणाय छात्रान् युवाध्यापकान् च अन्तर्भाव्य तेषां प्रशिक्षणोद्देश्यस्य कृते प्राधान्यं दीयते।

**अनुदानस्य उपलब्धिः-** भारतीयज्ञानपरम्पराकेन्द्रस्य समर्थनाय भारतीयज्ञानपरम्पराविभागस्य कार्यक्रमस्य संचालनार्थं च वित्तसहायः भारतसर्वकारस्य शिक्षामन्त्रालयेन क्रियते।प्रतिवर्षम् एतस्य कार्यक्रमस्य कृते धनराशेः स्तरः भारतसर्वकारस्य शिक्षामन्त्रालयेन निर्धार्यते। भारतीयज्ञानपरम्पराविभागः देशस्य नैकस्थानेषु केन्द्राणि स्थापयिष्यति यत्र वर्षद्वयस्य 20लक्षतः 40 लक्षपर्यन्तं वित्तपोषणस्तरः भविष्यति।

भारते भारतीयज्ञानपरम्परायाः मौलिकस्य गम्भीरस्य विद्वत्तापूर्णस्य अनुसन्धानस्य प्रोत्साहनं तथा भारतीयज्ञानपरम्परासंबद्धस्य अनुसन्धानस्य पुनरुज्जीवनं च प्रति उत्प्रेरकवित्तीयसहायप्रदानं लक्ष्यं विद्यते। प्रत्येकं केन्द्रं न्यूनातिन्यूनं द्वयोः अधिकतया चतुर्षु च विषयगतक्षेत्रेषु केन्द्रीक्रियते इति अपेक्षा अस्ति। केन्द्रीकृतविषयाणां विना चयनं

केवलकेन्द्रस्थापनार्थं समर्पितः प्रस्तावः न प्रोत्साहितो भवति तथा समीक्षातः प्रथमसोपाने एव निस्सारितो भवति। प्रायोगिकोत्पन्नानां कृते अभ्यासस्य कृते समसामयिकसामाजिकसमस्यानां परिहारयोग्यस्य च वित्तीयानुसन्धानप्रस्तावस्य कृते प्रामुख्यं प्रदीयते।भाविविदुषां निर्माणाय छात्रान् युवाध्यापकान् च अन्तर्भाव्य तेषां प्रशिक्षणोद्देश्यस्य कृते प्राधान्यं दीयते।

**अनुदानस्य उद्देश्यम् अपेक्षितानि कार्याणि च-** प्रत्येकं भारतीयज्ञानपरम्पराभाषाकेन्द्रस्य कृते

मानवीयशक्तिं (अनुसन्धानसहायकाः, परियोजनासहायकाः, प्रशिक्षवः) आपूर्तिं, सौविध्यानि, वि विधव्ययं च प्रति अनुदानस्य उपलब्धिः क्रियते।भाषाकेन्द्रस्य आद्यं कार्यं वर्तते यत् अधोलिखितगतिविधीनां (इमानि केवलम् उदाहरणानि सन्ति नतु संपूर्णगतिविधयः) माध्यमेन राष्ट्रियशिक्षानीतिः-2020 इत्यस्य कार्यान्वयनार्थं भारतीयज्ञानपरम्पराविभागस्य कृते सहायाचरणम्।

1. क्षेत्रीयभाषासु लिखितानां भारतीयज्ञानपरम्परासंबद्धानां लेखानां, पाण्डुलिपीनां, पुस्तकानां, विद्वद्भिः कृतानां कार्याणां च संग्रहः।
2. भाषाकेन्द्रस्य निर्दिष्टक्षेत्रीयभाषायां भारतीयज्ञानपरम्परासंबद्धानां विषायाणां लघुपुस्तकानां (100-150 पृष्ठानि) निर्माणम्।
3. क्षेत्रीयभाषायाम् उपलब्धानाम् उद्धरणपुस्तकानां तथा अन्यसमाग्रीणां संस्कृतानुवादः आङ्ग्लानुवादः च ।

**एकवर्षस्य कृते अपेक्षाः**

1. क्षेत्रीयभाषास्रोतसः आधारेण भारतीयज्ञानपरम्परासंबद्धानां विषये न्यूनातिन्यूनं 10पुस्तकानि (100-150 पृष्ठात्मकानि) निर्मेयानि। एतानि पुस्तकानि राष्ट्रस्तरे प्रसारप्रचारार्थं संस्कृतभाषायाम् आङ्ग्भाषायां वा अवश्यम् उपलब्धानि भवेयुः।
2. न्यूनातिन्यूनं 1000 पृष्ठानि भारतीयज्ञानपरम्परासंबद्धाः संस्कृत/आङ्ग्भाषया विलिखिताः विषयाः क्षेत्रीयभाषायाम् अनुवादः करणीयः।
3. भविष्ये ऑनलाइन-पाठ्यक्रमस्य सञ्जतायै स्नातकस्तरस्य अथवा ततः अधिकस्तरस्य न्यूनातिन्यूनम् एकं पाठ्यक्रमं (30-40 घण्टानां व्याख्यानम्/पाठ्यक्रमम्) निर्माय संरक्षणं करणीयम्।

विना राजस्वं भाषाकेन्द्रैः निर्मितानाम्, संरक्षितानां च सर्वेषां सामग्रीणाम् उपयोगस्य अधिकारः भारतीयज्ञानपरम्पराविभागस्य अस्ति।प्रतिलिप्यधिकारः भारतीयज्ञानपरम्पराविभागस्य कृते अवश्यमेव स्थानान्तरितः भवेत् । योगदानकर्तुः लेखकस्य सर्वप्रलेखानां कर्तृत्वं रक्षितं भवति।

**भारतीयज्ञानपरम्पराकेन्द्राणां मूल्याङ्कनम्-** भारतीयज्ञानपरम्पराकेन्द्राणां साफल्यस्य निरीक्षणं मासत्रये दूरवाणीमाध्यमेन मुख्यपरिशोधकेन सह संभाषणमुखेन तथा केन्द्रगतिविधीनां वार्षिकप्रतिवेदनमाध्यमेन च क्रियते।भारतीयज्ञानपरम्परायाः समुदाये फलितांशस्य प्रसाराय अन्तर्जालपुटे परियोजनायाः फलितांशः नविनीक्रियते। भारतीयज्ञानपरम्पराकेन्द्रकार्यस्य मूल्याङ्कने प्रस्तावितपरियोजनानां संख्या, प्रकाशितशोधपत्राणि, समीक्षितसाहित्ये प्रकाशनम्, लोकप्रियलेखाः, छात्रप्रशिक्षणं मार्गदर्शनं च अध्यापकप्रशिक्षणकार्यशाला, लघुप्रबन्धाः, पाठ्यक्रमपुस्तकप्रकाशनं च अन्तर्भवन्ति।अन्यमूल्याङ्कनस्य विषये मुख्यपरिशोधकः पूर्वमेव सूचितो भवति।एकवर्षात् परं कस्मिंश्चिदपि भारतीयज्ञानपरम्पराकेन्द्रे सन्तोषप्रदायकप्रगतिः (यथा स्वतन्त्रसमीक्षकेन सूचितम्) नास्ति चेत् अनुदानस्य स्थगनस्य अधिकारः भारतीयज्ञानपरम्पराविभागस्य कृते अस्ति।

## अनुसन्धानप्रस्तावानाम् अर्हता मानकविधिश्च /सिद्धता आवेदनसूचनाः च

भारतीयज्ञानपरम्परापविभागेन भारतीयज्ञानपरम्पराविषयेषु कार्यं कुर्वतां शोधकर्तृणाम् अनुसन्धानप्रस्तावाः आमन्त्र्यन्ते। सर्वकारेण मान्यताप्राप्तानां शैक्षणिकसंस्थानां संकायसदस्याः (सर्वकारेतरशैक्षिकसंस्थाः/सार्वजनिकसंस्थाः) , सर्वकारेण वित्तपोषिताः प्रयोगशालाः सर्वकारेतरसंस्थाः/, समुदायाः/प्रतिष्ठानानि च आवेदयितुम् अर्हन्ति। अनुदानस्य प्राप्त्यर्थं सर्वकारेतरसंस्थाः/समुदायाः/प्रतिष्ठानानि भारतीयज्ञानपरम्परासम्बद्धविषयेषु अनुसन्धानं शैक्षणिककार्यं च अवश्यं कुर्वन्तः भवेयुः। कयाचित् संस्थया सह संबद्धतां विना स्वतन्त्राः शोधकर्तारः आवेदयितुम् आर्हाः न भवन्ति। ये शोधकर्तारः पूर्वषु चक्रेषु आरएफपी-कार्यक्रमस्य माध्यमेन आईकेएस-विभागेन वित्तपोषिताः सन्ति, ते प्रधान-अनुसन्धातृरूपेण आवेदनं कर्तुं योग्याः न सन्ति। उत्तमानुसन्धानस्य वित्तीयानुदानम् अस्माकं प्राथमिकता अस्ति।यदा प्रस्तावनाः समानाङ्कान् प्राप्नुवन्ति तत्र प्राधान्यं क्रमशः सहायकाचार्यस्य, सहाचार्यस्य आचार्यस्य च कृते यच्छामः। एका संस्था एकमेव अनुसन्धानप्रस्तावम् आवेदयितुं शक्नोति।अष्टमानुसूच्यां अन्तर्भूतासु भारतीयभाषासु कयाचिदपि भाषया अथवा आङ्ग्लभाषया प्रस्तावं समर्पयितुं शक्नुवन्ति।

1. भारतीयज्ञानपरम्पराकेन्द्रप्रस्तावाः राष्ट्रियशिक्षानीतिः-2020इत्यस्य कार्यन्वयनार्थं भारतीयज्ञानपरम्पराविभागस्य प्रयत्नं प्रति कथं सहकुर्वन्ति इति विषये केन्द्रिताः स्युः।
2. न्यूनातिन्यूनं भारतीयभाषाद्वये मुख्यपरिशोधकस्य प्रावीण्यं विशेज्ञता वा स्यात्।
3. अनुसन्धानसमूहे न्यूनातिन्यूनम् एकः सदस्यः अनुवादस्य सहायं विना मूलपाठस्य अध्येता ज्ञाता च अवश्यं स्यात्।
4. संयुक्तानाम् अन्तर्विषयकानुसन्धानानां च परियोजनां प्रति प्राधान्यं दीयते तथा तेषां प्रोत्साहनमपि क्रियते।
5. वित्तीयानुदानरूपेण वर्षद्वयस्य कृते विशिष्टपरियोजनानां कृते 05लक्षतः 12लक्षपर्यन्तं प्रदीयते। केषुचित् विशेषसन्दर्भेषु यत्र प्रयोगात्मकपरियोजनानां कृते पर्याप्तसम्पदाम् आवश्यकता भवति तत्र अतिरिक्तानुदानस्य विचारः भविष्यति। परन्तु कस्मिन् अपि सन्दर्भे वर्षद्वयस्य कृते 15लक्षतः अधिकानुदानं न प्रदीयते।
6. **2024वर्षस्य दिसम्बरमासस्य 31दिनाङ्कात् पूर्वं** परियोजना अवश्यं पूर्णा भवेत् ततः परं दिनाङ्कस्य परिवर्धनं न क्रियते।
7. **प्रस्तावानां समयसीमा 2022 वर्षस्य सप्तम्बरमासस्य 30 दिनाङ्कस्य रात्रौ 11.59** पर्यन्तं भवति तथा आनलाईनमाध्यमेनैव (iksindia.org)आवेदनीयम्।अन्यमाध्यमैः समागतं आवेदनं न परिगण्यते । समयातीतानि आवेदनानि न स्वीक्रियन्ते।
8. भारतीयज्ञानपरम्पराविभागं प्रति समीक्षासमितेः कृते प्रस्तावाननां नामनिर्देशनार्थम् अधिकारो विद्यते। तथा अन्तरिकसमीक्षाद्वारा निर्धारितं भारतीयज्ञानपरम्पराविभागस्य ध्येयं अग्रे नयति। अन्येषां प्रस्तावानां कृते या समीक्षा प्रक्रिया समाश्रियते तया प्रक्रियैव एव नामाङ्कितप्रस्तावेषु विचारः भविष्यति।
9. स्वीकृतानां प्रस्तावानाम् उद्घोषणात् परं 2022 वर्षस्य दिसम्बरमासे अनुदानम् उपलब्धं भविष्यति।
10. कार्यप्रगतिविवरणं 2023वर्षस्य जुलैमासस्य प्रथमे दिनाङ्के 2023वर्षस्य दिसम्बरमासस्य एकत्रिंशत्-दिनाङ्के 2024वर्षस्य जुलैमासस्य प्रथमे दिनाङ्के च समर्पणीयम्। परियोजानायां कृतस्य अनुसन्धानकार्यस्य समीक्षा एकस्य वर्षस्य अन्ते समित्या भविष्यति। तस्याः समित्याः अनुशंसनात् परमेव अवशिष्टस्य अनुदानस्य उपलब्धिः भविष्यति।
11. अन्तिमं प्रतिदवेदनं 2024वर्षस्य दिसम्बरमासस्य 31दिनाङ्कात् पूर्वं समर्पणीयम् । विस्तृतविवरणेन सह ज्ञानपरम्पराविभागः अनुरोधं करोति यत् त्रिशतं पदानतिरिक्तं

सरलभाषया सारांशं( अन्तर्जाले स्थापनयोग्यम्) तथा कार्यसम्बन्धीनि चित्राणि च प्रतिवेदनेन सह प्रेषणीयानि। अस्य उपयोगः भारतीयज्ञानपरम्पराविभागस्य वार्षिकप्रतिवेदने अन्तर्जाले वा क्रियते ।

12.एतस्याः प्रस्तावमार्गदर्शिकायाः पालनं न क्रियते चेत् प्रस्तावस्य समीक्षा वित्तीयानुदानं च न भविष्यति।

- कृपया प्रदत्तस्य प्रस्तावटेम्प्लेट-इत्याख्यस्य उपयोगं कुर्वन्तु ।यदि अभिलेखनाम् अन्ते अस्य संस्करणस्य उपयोगः क्रियते चेत् पृष्ठसंयोजनं कुर्यात् ।
- प्रदत्तानि हस्ताक्षरपृष्ठानि उपयुज्यन्ताम्। तथा एतानि अभिलेखेषु पृथक् पृष्ठत्वेन संयोजनीयानि।
- प्रदत्तम् आवरणपृष्ठं पूर्यताम् तथा तत् अभिलेखेषु पृथक् पृष्ठत्वेन संयोजनीयम्।
- समुचितसन्दर्भसूचीभिः सह प्रस्तावः दशपृष्ठातिरिक्तो न स्यात् । प्रस्तावः स्पष्टः सरलमानकभाषया स्यात् तथा अधिकाधिकं पञ्चदश अतिरिक्ताः सन्दर्भाः न भवेयुः। उद्धरणात् परं सूचिबद्धं कुर्वन्तु।
- सर्वेषु पक्षेषु 1इन्च मार्जिन एकपङ्क्त्यन्तरालं न्यूनातिन्यूनं 11परिमितस्य अक्षरविन्यासस्य उपयोगः च स्यात् ।
- यदि भवान् पृष्ठसङ्ख्यानाम् उपयोगं करोति तर्हि अधोभागस्य मध्यस्थाने स्थापयतु।
- संपूर्णप्रस्तावः अधोलिखितानुगुणं पृथक् अभिलेखैः(पीडीएफ-मात्रम्) सह युक्तो भवेत्।
- अभिलेखः -1 : मुखपृष्ठम्
- अभिलेखः -2 : प्रस्तावकथनम्
- अभिलेखः -3 : आयव्ययपृष्ठम्
- अभिलेखः -4 : मुख्यपरिशोधकस्य सहायकपरिशोधकस्य व्यक्तिगतविवरणी
- अभिलेखः -5 : मुख्यपरिशोधकस्य हस्ताक्षरम्, सांस्थानिकानुमोदनपृष्ठानि च
- प्रत्येकम् अभिलेखस्य परिमाणम् 10MB.स्यात् ।
- यदा भवतः प्रस्तावः अन्तिमस्वरूपं प्राप्नोति तदा पीडीएफसञ्चिकां BGSamposhini2_YOURLASTNAME इति नामकरणम् कृत्वा रक्षयेत्।

13.समर्पणप्रक्रिया

- कृपया भारतीयज्ञानपरम्पराविभागस्य अन्तर्जालं गत्वा विवरणम् iksindia.org इत्यत्र पूरयतु।
- PDF प्रस्तावसञ्चिकां (<10 MB) आरोपयतु ततः सबमिट-पिञ्जं नुदतु।
- यदि भवता सफलतया अन्तर्जाले आरोपितं चेत् दिनद्वयाभ्यन्तरे सफलतया आरोपितमिति सूचना प्रदीयते।यदि एतादृशी सूचना न प्राप्ता कृपया भारतीयज्ञानपरम्पराविभागस्य संपर्कः क्रियताम्।

14. अनुदानस्य वितरणम्

- भारतीयज्ञानपरम्पराकेन्द्रस्य कृते वर्षद्वयस्य कृते अनुदानस्य उपलब्धिः अंशद्वयेन भवति।
- यदि प्रस्तावे प्रस्तावितानुदानराशिः अनुदानसीमातः अधिकोस्ति चेत् समीक्षां विना तिरस्क्रियते तथा समीक्षातः बहिष्कृतो भवति।
- वित्तीयानुदानस्य उपलब्धिः अधोलिखितानुगुणं क्रियते
- परियोजनाकर्मचारिणः/परियोजनासहायकाः/शोधाध्येतृवृत्तिः/प्रशिक्षुः इत्येतेषां कृते **वेतनम्**।


  **मानदेयम्** मुख्यपरिशोधकस्य कृते एकस्य वर्षस्य कृते 1लक्षं मानदेयं प्रदीयते।यदि अधिकाः सहपरिशोधकाः सहायकाः वा सन्ति तदा मानदेयरूपेण 1.5लक्षं प्रदीयते तच्च मानदेयं सहपरिशोधकानां सहायकानां वा कृते समविभक्तं स्यात् तथा सहपरिशोधकानां सहायकानां वा कृते मानदेयम् अधिकाधिकं 0.5लक्षं स्यात्। एतदतिरिच्य अन्यमानदेयानि न स्वीकृतानि सन्ति।मानदेयं तावत् एकस्मिन् वर्षे निर्दिष्टानां कार्याणां संपूर्णसमाप्तेः परमेव प्रदीयते। सहायकपरिशोधकस्य च कृते मानदेयं न प्रदीयते। यथा, प्रथमवर्षस्य मानदेयं द्वितीयवर्षस्य आरम्भे प्रथमवर्षस्य निर्दिष्टानां कार्याणां समाप्तेः अनन्तरम् उपलब्धं भवति।
- **आपूर्तिः :** अत्र दशसहस्रन्यूनमूल्यस्य उपकरणानि भागरूपेण अन्तर्भूतानि। यतः दश तापमानयुक्तानां संवेदकानां रासायनिककूपीनाम् आपूर्तिः अनुमन्यते। प्रारूपाणां विश्लेषणार्थं यत् किमपि सेवाशुल्कम् अनुदाने योजयितुं शक्नुवन्ति ।

- **उपकरणानि/सौविध्यानि** : दशसहस्रम् अथवा तन्न्यूनमूल्यम् उपभोग्यवस्तु उपकरणमिति परिगण्यते।कृपया ज्ञातव्यं यत् अस्यां परियोजनायां नूतनसौविध्यानां (इष्टिकादीनाम्) निर्माणस्य अनुमतिः नास्ति।अस्य अनुदानस्य अन्तर्गतं पुस्तकादिसंसाधनानां स्वीकृत्यर्थम् अनुमतिः अस्ति। सङ्गणकस्य/लैपटॉप/मुद्रकस्य क्रयणस्य अनुमतिः विद्यते तदर्थं परियोजनान्तर्गतं अधिकाधिकं 01.5लक्षं व्ययीकर्तुं शक्यते।परियोजनायाः समाप्तेः परं सङ्गणकम्/लैपटॉप/मुद्रकं इत्यादिसंसाधनानि मुख्यपरिशोधकस्य संस्थायाः संपत् भवति।
- **शिक्षा/मार्गदर्शनम्/प्रसारः** : शिक्षा- मार्गदर्शन-आउटरीच-योजनानां च प्रभाविरूपेण कार्यान्वयनं कर्तुं धनराशिः अनुमतः अस्ति। आउटरीच गतिविधयः केवलं भारतीयज्ञानपरम्पराकेन्द्रिताः स्युः तथा च भारतीयज्ञानपरम्पराकेन्द्राणां मुख्यक्षेत्रेषु केन्द्रीकृताः भवितुमर्हन्ति।
- **यात्रा संगोष्ठी च** : भारते समायोजितासु राष्ट्रियसंगोष्ठीषु भागग्रहणाय यात्रासम्बन्धिव्ययः प्राप्तानुदाने अनुमतः अस्ति।अन्ताराष्ट्रीययात्रायाः अनुमतिः नास्ति।मुख्यपरिशोधकेन भारतीयज्ञानपरम्पराविभागेन आयोजितायां संगोष्ठ्यां/सम्मेलने भागग्रहणाय योजना निर्मातव्या।
- **आकस्मिकव्ययः** : अनुदानराशितः अधिकतमं पञ्चप्रतिशतम् आकस्मिकव्ययं कर्तुं अनुमतिः विद्यते।
- **अतिरिक्तव्ययः** : अनुदानराशितः अधिकतमं पञ्चप्रतिशतम् अतिरिक्तव्ययं कर्तुं अनुमतिः विद्यते।
- **अधिकव्ययः** : अनुदानराशितः अधिकतमं पञ्चप्रतिशतम् अतिरिक्तव्ययं कर्तुं अनुमतिः विद्यते।
- **अवलम्बनानुदानम्** : इदम् अनिवार्यं नास्ति तथापि भारतीयज्ञानपरम्पराविभागस्य संसाधनानाम् अल्पोपयोगार्थं सांस्थानिकसमर्थनद्वारा अन्यवित्तीयस्य अवलम्बनानुदानस्य अथवा अन्यविधवस्तुरूपस्य समर्थनं प्राप्तुं प्रोत्साहः क्रियते।कृपया अस्याः परियोजनायाः कृते अन्येभ्यः स्रोतोभ्यः मौद्रिकं वस्तुगतं च समर्थनं प्राप्तं चेत् सूचयन्तु।

15.यदि सन्देहाः स्युः तर्हि साक्षात् भारतीयज्ञानपरम्पराविभागस्य (coiks@aicte-india.org) संपर्कं कुर्वन्तु।

### समीक्षाप्रक्रिया

1. वयं निष्पक्षपातसमीक्षाप्रक्रियाम् अनुसरामः।
2. सर्वेषां प्रस्तावानां समीक्षा स्वतन्त्रविशेषज्ञेन क्रियते।
3. समीक्षकैः श्रेणीमानदण्डविधिः अनुस्रियते। सः अधोनिर्दिष्टः अस्ति।
4. अन्तिमचयनार्थं विशेषज्ञसमित्याः समक्षं प्रस्तुतिः भविष्यति।
5. मुख्यपरिशोधकः स्वप्रस्तावस्य प्रतिशताङ्कान् तथा समीक्षकाणां टिप्पणीं च प्राप्नोति।चितानां प्रस्तावानां कृते प्राप्तानां न्यूनतमाङ्कानां शैक्षणिकाखण्डतायाः पारदर्शितायाः च दृष्ट्या विनिमयः क्रियते।




**6 . स्वरूपम् 1. सोपानत्रयस्य समीक्षाप्रक्रियायाः अवलोकनम् (a: संपूर्णसमीक्षाप्रक्रिया b सोपानम् । समीक्षाप्रक्रिया; c एवं d द्वितीयसोपानस्य त्रतीयसोपानस्य च समीक्षाप्रक्रिया)**

## प्रस्तावानां श्रेणीमानदण्डविधिः

भवतः प्रस्तावस्य समीक्षकैः प्रस्तावस्य मूल्याङ्कनार्थम् अन्येषां विरुद्धं क्रमाङ्कनार्थं च अधोलिखितमापदण्डानाम् उपयोगः क्रियते। कृपया एतेषां प्रश्नानां विषये सम्यक् चिन्तयन्तु तथा च निर्दिष्टप्रस्तावसंरचनायाः उपयोगेन स्वप्रस्तावे स्पष्टतया उत्तरं ददातु।

- किं भारतीयज्ञानपरम्पराकेन्द्रस्य लक्ष्यं भारतीयज्ञानपरम्पराविभागस्य ध्येयेन केन्द्रीकृतवषयैः च सह संबद्धा? (20 अङ्काः)
- किम् भारतीयज्ञानपरम्पराकेन्द्रस्य लक्ष्यं स्पष्टतया उक्तम् अवगमनयोग्यं च? (10 अङ्काः)
- प्रस्ताविते केन्द्रे महत्त्वपूर्णसमस्यां क्षमतां वा अधिकृत्य शोधकार्यं कर्तुं स्पष्टा शोधयोजना अस्ति ? (10 अङ्काः)
- अस्य अध्ययनस्य परिणामाः उपयोगिनो भविष्यन्ति?किं तैः व्यत्यासः लक्ष्यते?(15 अङ्काः)
- प्रस्ताविते केन्द्रे स्पष्टशैक्षिकयोजना अस्ति वा ? (10 अङ्काः)
- प्रस्ताविते केन्द्रे छात्राणां युवाध्यापकानां च कृते स्पष्टमार्गदर्शनयोजना अस्ति वा? (10 अङ्काः)
- परिणामाः सामाजिकैः संप्रेषिताः भविष्यन्ति वा? (05 अङ्काः)
- अनुसन्धाने निष्पादितस्य कार्यस्य कृते प्रस्तावितं वित्तीयविवरणम् सम्यक् इति प्रतीयते वा? (05 अङ्काः)
- प्रस्तावितविषये अनुसन्धानं कर्तुं मुख्यपरिशोधकस्य तत्समूहस्य च अपेक्षितदक्षता, पूर्वानुभवः, विशेषज्ञता च अस्ति वा? (15 अङ्काः)

  प्रस्तावस्य बलं (100 शब्दपर्यन्तम्) : कृपया प्रस्तावस्य विशिष्टानि बलानि सूचीबद्धं कुर्वन्तु।

  प्रस्तावस्य दुर्बलता (100 शब्दपर्यन्तम्) : कृपया प्रस्तावस्य विशिष्टाः दुर्बलताः यदि सन्ति तर्हि सूचीबद्धं कुर्वन्तु।

  दुर्बलतायां सत्यामपि किं भवन्तः मन्यन्ते यत् कानिचन विशिष्टकारणानि सन्ति येषां कारणात् परियोजना अधुनापि समर्थनार्थं विचारणीया भवेत्?

  सारांशकथनम् (100 शब्दपर्यन्तम्) : कृपया सूचयन्तु यत् अस्य प्रस्तावस्य समर्थनं कर्तव्यं वा न वा।

## प्रस्तावस्य सिद्धतार्थं मार्गदर्शनम्

**भवतः प्रस्तावस्य निर्माणे विचाराः**

1. अस्य कार्यक्रमस्य मुख्यम् उद्देश्यं वर्तते यत् भारतीयज्ञानपरम्पराकेन्द्राणां संस्थापनं तथा तानि केन्द्राणि भारतीयज्ञानपरम्पारायाः कृते राष्ट्रियशिक्षानीतिः2020 इत्यस्य राष्ट्रस्तरे कार्यान्वयानाय प्रामाणिकमूलसामग्रीप्रदानम्, पाठ्यक्रमसामग्रीनिर्माणम्, पाठ्यक्रमस्य प्रसारः, नैकभारतीयभाषासु भारतीयज्ञानपरम्पराक्षेत्रसंबद्धनां सामग्रीणां निर्माणम्,इत्यस्य प्रदानार्थं सहायम् आचरन्ति।
2. प्रस्तावितानुसन्धानस्य उद्देश्यं भविष्ये दीर्घकालं यावत् प्रमुखविकासानां नेतृत्वं विधातुं भारतीयज्ञानपरम्परायाः ध्येयं प्रति च योगदानं कर्तुम् उन्मुखो विद्यते इति उत्तमप्रस्तावः अभिद्योतयति।केवलं जिज्ञासायाः उपशमनं प्रति, सन्दर्भितपत्राणां कृते सामग्रीसंकलनं प्रति वा भारतीयज्ञानपरम्पराविभागस्य आसक्तिः नास्ति तथा च एतत् समीक्षकान् न प्रभावयति।
3. परियोजना भारतीयज्ञानपरम्पराविषयैः सह अवश्यं सम्बद्धा स्यात्।याः परियोजनाः पूर्वोक्तविषये नान्तर्भवन्ति सूचनां विना प्रथमसोपाने(आन्तरिकसमीक्षाप्रक्रियायाम्) एव निरस्तीक्रियन्ते। वर्षद्वये परियोजनानां संपूर्तेः स्पष्टता अवश्यं स्यात्।परियोजनाः स्पष्टाः परिणात्मिकाः सन्देशात्मिकाः च स्युः।परियोजनानां कृते विस्तृतप्रतिवेदनस्य लेखनस्य आवश्यकता विद्यते। प्रदर्शनकलाभिः सह सम्बद्धानां परियोजनानां कृते व्यापकं बहुमाध्यमप्रसारस्य अभिलेखीकरणम् अपेक्षितम् अस्ति।

**सारणी 1. भारतीयज्ञानपरम्परायाः परियोजनारूपेण किम् अर्हतां/न अर्हतां प्राप्नोति इति उदाहरणानि –**

| इयं भारतीयज्ञानपरम्परापरियोजना अस्ति | इयं भारतीयज्ञानपरम्परापरियोजना नास्ति |
|---|---|
| प्राचीनसेतुषु/दुर्गेषु/मन्दिरेषु प्रयुक्तनाम् मिश्रकसंरचनानाम् अध्ययनम्। | स्थानीयक्षेत्रे सेतूनां नौकानां च अध्ययनम् |
| समुदायैः अभ्यस्तानां जलशुद्धिकरणपद्धतीनां अभिलेखीकरणं मूल्याङ्कनं च। | नद्यां प्लास्टिकप्रदूषणस्य निरीक्षणम्। |
| चाणक्यस्य अर्थशास्त्रस्य प्रासङ्गिकतायाः समन्वयतायाश्च अध्ययनं तथा तस्य साम्प्रतिकसमाजिकसमस्यायाः निवारणे प्रासङ्गिकता च। | एडम स्मिथ अथवा एमएमटी इत्यस्य आर्थिक- सिद्धान्तानाम् अध्ययनम्। |
| धोलवीर लोथेल इति प्रदेशे निर्मितानां नौकानिस्स्थानानाम् अध्ययनं तथा तेषां सामर्थ्यस्य आकलनम् | नौकानिस्स्थाने नौकायाः अध्ययनम् |
| छात्राणाम् संज्ञानात्मकसामर्थ्यविकासे संस्कृतशिक्षायाः प्रभावस्य अध्ययनम् | संस्कृतशिक्षा कथं प्रदीयते इति द्रष्टुं |

| | |
|---|---|
| | विद्यालयानां भ्रमणम्। |
| साम्प्रतिकसमाजस्य दृष्ट्या पुराणेषु विद्यमानानां पदानां (उदा. धर्मः, न्यायः पापम् पुण्यम्, इत्यादीनि) सन्दर्भोचितस्य व्युत्पत्यर्थस्य अन्वेषणम् | पुराणेषु प्रयुक्तानां शब्दानां (उदा. धर्मः, न्यायः पापम् पुण्यम्, इत्यादीनि) गणना |

4. स्पष्टनिर्देशः एव कुञ्चिका अस्ति : ये प्रस्तावाः अनुसन्धानस्य योगदानं स्पष्टतया निर्दिशन्ति ते अधिकान् अङ्कान् प्राप्नुवन्ति।
5. यतोहि सम्भाव्यप्रयोक्तृभ्यः अनुसन्धानस्य परिणामस्य कथनं महत्त्वपूर्णं भवति। अथ च एतादृशानां कार्याणां परिशोधनार्थं धनव्ययः अनुमतः अस्ति।
6. वयं सौविध्यानां (भवनादीनाम्) अधिग्रहणाय निर्माणाय वा वितीयानुदानं न दद्मः। प्रस्तावितम् अनुसन्धानं विधातुम् अपेक्षितानाम् उपकरणानां विक्रयणाय अनुरोधं कर्तुम् अनुमतिः विद्यते। प्रस्तावे भवतः अपेक्षितानाम् उपकरणानाम् उल्लेखः अवश्यं करणीयः अस्ति तथा च अस्मिन् विशिष्टे अनुसन्धानकार्य्ये उपकरणस्य उपयोगः कथं भविष्यति इति निर्देष्टव्यम्। भवतः प्रयोगशालायाः सज्जीकरणाय अन्यसौविध्याय च वित्तीयानुदानं न प्रदीयते।
7. एतत् स्यात् यत् भवतः प्रस्तावस्य समीक्षकाणां विदुषां भवतः अनुसन्धानस्य विशेषक्षेत्रस्य विवरणेषु न्यूनपरिचयः भवितुम् अर्हति। कृपया औचित्यम्, उद्देश्यं, प्रक्रियां, प्रभावान् च स्पष्टतया लिखन्तु येन भवतः विषये न्यूनाभिज्ञः कश्चन जनः भवतः अभिप्रायं पार्श्वे स्थितेन प्रतिवेशिना सह वार्तालापः इव स्पष्टतया अवगन्तुं शक्नुयात्। यं प्रस्तावं समीक्षकाः सुलभतया अवगन्तुं न शक्नुवन्ति तादृशस्य श्रेण्यङ्कनं दुर्बलं भवति, वित्तीयानुदानं च न भवति।
8. यद्यपि भारतीयज्ञानपरम्परानुसन्धानप्रस्तावस्य निर्माणकाले अन्यस्मात् प्रस्तावात् सामग्रीं यथावत् आहर्तुं सुलभं स्यात् तथाचरितश्चेत् प्रस्तावः निरस्तो भविष्यति। यदि भवान् वाक्यांशान् विचारान् वा अन्यस्य प्रतिग्रहीतवान् (यथावत् आहरणं न) तर्हि सुनिश्चितं करोतु यत् भवान् उक्तितिथीनां समयरेखानां सन्दर्भाणां च अक्षरसंशोधनं स्वप्रस्तावे कृतवान् इति यतः सुलभतया तान् यथावत् स्थापयितुं शक्यते इति कारणेन।
9. मौलिकं नवीनं च आनुसन्धानं कृपापात्रं भवति। यदि क्रमबद्धं तर्हि भवता प्रस्तावितम् अध्ययनं कथं यथानुरूपम् अस्ति इति वर्णयतु ।
10. भविष्येपि वित्तीयानुदानं सर्वदा लभ्यते इति वक्तुं कष्टं किन्तु अनुसन्धानस्य परिणामाः अन्यस्रोतोभ्यः वित्तीयानुदानप्राप्तिं प्रति सहायं कुर्वन्ति इति सूचयतु।

11. कृपया मनसि धारयतु यत् अनुसन्धानस्य वित्तीयानुदानार्थं धनराशिः सीमितः अस्ति। धनराशेः उपलब्धतायाः आधारेण वित्तीयानुदानार्थं यथासंख्यं प्रस्तावानाम् आह्वानं करिष्यामः।

12. निश्चिनुत यत् सन्दर्भोद्धरणानि सन्दर्भ-खण्डे विद्यमानैः सह मेलनं भवन्ति उत नेति तथा च निश्चिनुत यत् केवलं पञ्चदश (15) सन्दर्भाः एव समाविष्टाः इति। एषा काचित् गणनासामर्थ्यपरीक्षापि अस्ति। पाठ्यसञ्चिकायां सूचीकृतान् "भूत" सन्दर्भान् अवश्यं निष्कासयन्तु किन्तु सन्दर्भखण्डे न। पाठकानां कृते अन्वेषणानुकूलदृष्ट्या अन्तर्जालसूचीनां समायोजनं कर्तुं शक्नुवन्ति। यद्यपि इयं सूची भवतः पञ्चदश-सन्दर्भसीमायां न गण्यन्ते, किन्तु कृपया पत्रिकालेखानां कृते अन्तर्जालसूची नोपयुज्यताम् ।

13. परियोजनायाः पूर्त्यर्थं भारतीयज्ञानपरम्परापरियोजनायाः वित्तीयानुदानम् अन्यवित्तीयानुदानेन सह उपयोक्तुमिष्टश्चेत् तस्यानुदानस्य मूलस्त्रोतसः धनराशेश्च संपूर्णविवरणं प्रयच्छन्तु।येन समीक्षकाणां कृते अनुदानं प्रदानुं नियन्त्रयितुं वा सुलभं स्यात्।

## भारतीयज्ञानपरम्पराविभागः
## शिक्षामन्त्रालयः
## एआईसीटीई
## भारतीयज्ञानसंपोषणकेन्द्रम् -2

**2022 भारतीयज्ञानसंपोषणकेन्द्रप्रस्तावस्य मुखपृष्ठम् (पृष्ठसीमा न समाविष्टा)**

प्रस्तावस्य शीर्षकम् :

मुख्यपरिशोधकः :

नाम :

ईमेलसंकेतः :

दूरवाणीसंख्या :

शैक्षणिकपदम् :

नियुक्तिविधानम् :

कार्यस्थानम् :

शैक्षणिकविभागः :

**सह-परिशोधकः (यदि कश्चन स्यात्) :**

**सहकारी (यदि कश्चन स्यात्) :**

**परियोजनाधनराशिः :**

अहं प्रमाणयामि यत् परियोजनायाः नेतृत्वं करिष्यामि तथा च प्रस्तावे उल्लिखितानि सर्वाणि कार्याणि सम्पादयामि इति।परियोजनायाः समाप्तेः परं परियोजनायाः सम्पूर्णं प्रतिवेदनं समर्पयिष्यामि तथा च एतत्कार्यसम्बन्धिनः कस्यापि प्रकाशने एआईसीटिस्थात् शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागात् अनुदानं स्वीकृतमिति अहं प्रमाणयामि।

**मुख्यपरिशोधकः**

**दिनाङ्कः**

**मुख्यपरिशोधकस्य मुद्रितनाम**

## 2022-23 भारतीयज्ञानपरम्परासंपोषणकेन्द्रप्रस्तावस्य स्वरूपम् (दशपृष्ठानि सीमितानि; प्रत्येकं वर्गे शब्दसीमाम् अतिक्रान्तानां प्रस्तावानां समीक्षां विना निरस्तीकरणं भविष्यति।)

**परियोजनायाः अवलोकनम् (250-शब्दाः) :** कं विषयमाश्रित्य परियोजना अस्ति? परियोजनाविचारस्य वर्णनं कुरुत।

**भारतीयज्ञानपरम्परायाः ध्येयं प्रति योगदानम् (250 शब्दाः) :** एषा परियोजना भारतीयज्ञानपरम्परायाः ध्येयं प्रति कथं योगदानं करोति?

**औचित्यम् (500 शब्दाः) :** कृपया परियोजनायाः महत्त्वम् औचित्यं च प्रदीयताम्।

**उद्देश्यं समयसीमा च (250 शब्दाः) :** कृपया अस्याः परियोजनायाः विशिष्टस्य उद्देश्यस्य स्पष्ट- सूची प्रदीयताम्। अस्य कृते द्वित्राणि उद्देश्यानि पर्याप्तानि। स्पष्ट-विशिष्टोद्देश्ययुक्तं प्रति अधिकं महत्त्वं प्रदीयते।

**परियोजनायाः बौद्धिकयोग्यता (250 शब्दाः) :** अस्याः परियोजनायाः बौद्धिकयोग्यता का? कृपया परियोजनायाः वैज्ञानिकप्रभावं स्पष्टतया निर्दिशन्तु। प्रस्ताविते अनुसन्धाने केषां केषां वैज्ञानिकप्रश्नानां समाधानं भविष्यति?

**परियोजनायाः व्यापकप्रभावः (250 शब्दाः) :** व्यापकाः सामाजिकाः, आर्थिकाः पर्यावरणीयाश्च प्रभावाः के? भारतीयज्ञानपरम्परायाः प्रचाराय केन्द्रं कथं सहकरोति?

**प्रस्तावस्य निर्गलितांशाः परिणामाः च (250 शब्दाः) :** परियोजनायाः निर्गलितांशाः परिणामाः च के? कृपया विशिष्टपरिणामानां सूचीं सज्जीकुरुत। परिणामानां विवरणार्थम् अनुच्छेदानां उपयोगं न कुर्वन्तु।

**प्रक्रियाः (1000शब्दाः) :** कृपया अस्यां परियोजनायां याः प्रक्रियाः प्रयुक्ताः भविष्यन्ति तासां सारांशः प्रदेयः। प्रक्रियायाः सारांशे साहित्यस्य अपेक्षिताः सन्दर्भाः उल्लेखनीयाः।

**शैक्षिकयोजना (250शब्दाः) :** छात्राः भारतीयज्ञानपरम्पराक्षेत्रस्य विषयं विज्ञातुं कथं योजनां करोति? भारतीयज्ञानपरम्पराकेन्द्रस्य अस्मिन् प्रस्तावे छात्राणां शिक्षणार्थं विशिष्टाः योजनाः काः सन्ति? उक्तकार्याणां विषयस्य स्पष्टता स्यात्।

**मार्गदर्शनयोजना (500शब्दाः) :** भाविविदुषां मार्गदर्शनं भारतीयज्ञानपरम्पराविभागस्य प्राधान्यम् अस्ति। परियोजनासहकारिणां, छात्राणां, प्रशिक्षुणां च कृते भवतः मार्गदर्शनयोजनाः काः सन्ति ये अस्मिन् केन्द्रेण सह सम्बद्धाः भविष्यन्ति? उक्तकार्याणां विषयस्य स्पष्टता स्यात्।

**प्रसारयोजना (250शब्दाः) :** भवान् स्वकेन्द्रस्य विद्यालयस्य/उच्चविद्यालयस्य/स्नातकोत्तरच्छात्राणां कृते परिणामान् प्रसारयितुं किदृशीं योजनां करोति? सामाजिकान् प्रति प्रापयितुं किदृशीं योजनां करोति? भवान् सामान्यजनानाम् कृते भारतीयज्ञानपरम्परायाः प्रचारं कथं करिष्यति ? उक्तकार्याणां विषयस्य स्पष्टता स्यात्।

**परियोजनायाः समूहः विशेषज्ञाश्च (250शब्दाः) :** कृपया प्रस्ताविते विषये मुख्यपरिशोधकस्य सहपरिशोधकस्य च पूर्वानुभवः उल्लेख्यः। अनुसन्धानप्रस्तावे उल्लिखिते विषये शोधकार्यं कर्तुं समूहस्य कृते कानि सौविध्यानि उपलभ्यन्ते? प्रस्तावस्य प्रत्येकम् अंशस्य निष्पादनाय प्रारम्भिकपरिणामानां दृष्ट्या प्रत्येकम् अन्वेषकस्य विशेषज्ञता उल्लेखनीया।

**सहपरिशोधकस्य सहकारिणः च विशिष्टभूमिका (यदि मुखपृष्ठे सूचितश्चेत्) (250 शब्दाः) :** समूहस्य सदस्यानां विशिष्टभूमिका का? समूहस्य सर्वेषां सदस्यानाम् पर्याप्तस्य योगदानस्य अन्तर्भावः अवश्यं स्यात्। यदि प्रस्तावे एकाधिकानां परिशोधकानाम् उल्लेखः अस्ति तर्हि प्रस्तावस्य उद्देश्यस्य कार्यान्वयनार्थं प्रत्येकम् परिशोधकस्य भूमिकायाः स्पष्टोल्लेखः महत्त्वपूर्णः अस्ति।

**समयनिर्धारणम् (100 शब्दाः) :** बीएआर रेखाचित्रमाध्यमेन परियोजनाकार्यस्य समयनिर्धारणं स्पष्टीकुरुत तथा कार्यस्य सोपानं सूचयत।

**उद्धृतसन्दर्भाः :**

**मूलसन्दर्भाः** रिक्तं न भवेत्। न्यूनातिन्यूनम् एकः मूलपाठः अवश्यमेव समाविष्टः भवेत्। मूलसन्दर्भाः प्रस्तावितयोजनायाः मूलग्रन्थः भवति। ये च सामान्यतः संस्कृते

अन्यभारतीयभाषासु वा विद्यते। समूहस्य न्यूनातिन्यूनम् एकः सदस्यः अन्यसहायं अनुवादं वा विना मूलपाठं पठितुं शक्नुयात्।

**अनूदितमूलग्रन्थः माध्यमिकसन्दर्भश्च** : ये मूलग्रन्थाः आङ्गभाषया सह विभिन्नभाषासु अनूदिताः तत्सम्बद्धो विद्यते। माध्यमिकसन्दर्भाः प्राथमिकग्रन्थानां कृते ग्रन्थान्/लेखान् निर्दिशन्ति।

**अन्ये सन्दर्भाः** : अन्ये सर्वे प्रासङ्गिकाः सन्दर्भाः अत्र समाविष्टाः सन्ति।

## 2022-23 भारतीयज्ञानपरम्परासम्पोषणकेन्द्रस्य कृते निर्धारितः धनराशिः (पृष्ठसीमायां न समाविष्टम् - कृपया सर्वाः संख्याः निकटतमेषु शतरूप्यकेषु वृत्तं कुर्वन्तु)

**सूचना** : प्रत्येकं परियोजनायाः 40लक्षस्य वित्तीयानुदानसीमायाः उल्लङ्घनं न कुर्वन्तु।निर्धारितधनराशेः अपेक्षया अधिकं प्रस्ताविताः प्रस्तावाः समीक्षां विना निरस्तीक्रियन्ते तथा समीक्षाप्रक्रियातः स्वतः एव निरस्ता भविष्यन्ति।

**वेतनम्** : अस्यां परियोजनायां शोधाध्येतृणाम्/परियोजनासहकारिणां वेतनं समावेशयन्तु। मुख्यपरिशोधकस्यसहपरिशोधकस्य वेतनम्/मानदेयराशिः अनुमतं नास्ति।

**आपूर्तिः** : रू10,000 तः न्यूनं वैयक्तिकखण्डमूल्ययुक्तानि उपकरणानि समाविष्टानि सन्ति। अर्थात् 1000रूप्यकमूल्ययुतानां दशपरिमततापमानसंवेदिकानां वा रासायनिककूपीनाम् आपूर्तिः अनुमतः। प्रारूपाणां विश्लेषणार्थं यत् किमपि सेवाशुल्कम् अपि स्यात्।

**उपकरणानि/सौविध्यानि** : दशसहस्रम् अथवा तन्न्यूनमूल्यम् उपभोग्यवस्तु उपकरणमिति परिगण्यते।कृपया ज्ञातव्यं यत् अस्यां परियोजनायां नूतनसौविध्यानां( इष्टिकादीनाम्) निर्माणस्य अनुमतिः नास्ति।अस्य अनुदानस्य अन्तर्गतं पुस्तकादिसंसाधनानां स्वीकृत्यर्थम् अनुमतिः अस्ति। सङ्गणकस्य/लैपटॉप/मुद्रकस्य क्रयणस्य अनुमतिः केवलम् असाधारणपरिस्थितौ लैखिकदृढसमर्थनया भारतीयज्ञानपरम्पराविभागस्य अनुमोदनात् परमेव भवति।

**शिक्षा/मार्गदर्शनम्/प्रसारः** : शिक्षा- मार्गदर्शन-आउटरीच-योजनानां च प्रभावीरूपेण कार्यान्वयनं कर्तुं धनराशिः अनुमतः अस्ति। आउटरीच गतिविधयः केवलं भारतीयज्ञानपरम्पराकेन्द्रिताः स्युः तथा च भारतीयज्ञानपरम्पराकेन्द्राणां मुख्यक्षेत्रेषु केन्द्रीकृताः भवितुमर्हन्ति।

**यात्रा संगोष्ठी च** : भारते समायोजितासु राष्ट्रियसंगोष्ठीषु भागग्रहणाय यात्रासम्बन्धिव्ययः प्राप्तानुदाने अनुमतःअस्ति।अन्ताराष्ट्रीययात्रायाः अनुमतिः नास्ति।मुख्यपरिशोधकेन भारतीयज्ञानपरम्पराविभागेन आयोजितायां संगोष्ठ्यां/सम्मेलने भागग्रहणाय योजना निर्मातव्या।

**आकस्मिकव्ययः** : अनुदानराशितः अधिकतमं पञ्चप्रतिशतम् आकस्मिकव्ययं कर्तुं अनुमतिः विद्यते।

**अतिरिक्तव्ययः** : अनुदानराशितः अधिकतमं पञ्चप्रतिशतम् अतिरिक्तव्ययं कर्तुं अनुमतिः विद्यते।

**संपूर्णम्** :

**अन्यवित्तीयानुदनस्रोतः** : इदम् अनिवार्यं नास्ति तथापि भारतीयज्ञानपरम्पराविभागस्य संसाधनानाम् अल्पोपयोगार्थं सांस्थानिकसमर्थनद्वारा अन्यवित्तीयस्य अवलम्बनानुदानस्य अथवा अन्यविधवस्तुरूपस्य समर्थनं प्राप्तुं प्रोत्साहः क्रियते।कृपया अस्याः परियोजनायाः कृते अन्येभ्यः स्रोतोभ्यः मौद्रिकं वस्तुगतं च समर्थनं प्राप्तं चेत् सूचयन्तु।

## व्यक्तिगतवृत्तप्रारूपम् **(प्रत्येकम् अन्वेषकस्य विवरणं पृष्ठद्वयं न अतिक्रामतु। व्यक्तिगतवृत्तप्रारूप- पत्राणि पृष्ठसीमायां न समाविष्टानि)**

1. नाम :

2. पत्राचारसङ्केतः :

3. ईमेल :

4. संपर्कसंख्या :

5. संस्था :

6. शैक्षणिकयोग्यता :

7. कार्यानुभवः (कालक्रमेण) :

8. व्यावसायिकमान्यता/पुरस्कारः/ प्रमाणपत्रम्, शोधवृत्ति :

9. समीक्षितप्रकाशनानि :

10. स्वामित्वविवरणम् (यदि स्यात्) :

11. पुस्तकानि/प्रतिवेदनम्/अध्यायाः/सामान्यलेखादि :

12. विगतेषु पञ्चसु वर्षेषु संचालिताः/पूर्णङ्गताः परियोजनाः :

13. इमां परियोजनां स्वीकर्तुं भवतः सामर्थ्यम् (अत्यधिकाः 500 शब्दाः) :

14. अन्यत्किमपि विवरणम् (अत्यधिकाः 500 शब्दाः)

# मुख्यपरिशोधकस्य प्रमाणपत्रम्

**(पृष्ठसीमायां न समाविष्टम्)**

**परियोजनाशीर्षकम्** .

प्रमाणीक्रियते यत्

1. अयं परियोजनाप्रस्तावः अन्यत्र वित्तीयानुदानार्थं न प्रस्तुतः।

2. अहं प्रतिजाने यत् परियोजनायां क्रीतानि उपकरणानि विरामकाले अन्येभ्यः उपयोक्तृभ्यः उपलभ्यन्ते।

3. यदि परियोजनायां क्षेत्रपरीक्षा/प्रयोगः/प्रतिकृतीनां मानवानां पशूनां च आदानप्रदानम् इत्यादीनाम् अन्तर्भावः स्यात् तर्हि सम्बद्धनैतिकसमित्या नैतिकानापत्तिप्रमाणपत्रं प्रस्तौमि इति प्रतिजाने।

4. योजनायां/परियोजनायां प्रस्तावितं शोधकार्यं कृतकार्यस्य अथवा क्रियमाणकार्यस्य प्रतिलिपिः नास्ति।

5. अहं अनुदानस्य विषये एआईसीटीस्थस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागस्य नियमानाम् अनुपालनाय सहमतः अस्मि।

मुख्यपरिशोधकस्य हस्ताक्षरम्

मुख्यपरिशोधकस्य नाम

मुख्यपरिशोधकस्य संबद्धता

दिनाङ्कः :

स्थानम् :

# संस्थाप्रमुखस्य अनुमोदनपत्रम्

(पृष्ठसीमायां न समाविष्टम्)

एतत् प्रमाणीक्रियते यत्

1. प्रमाणीक्रियते यत् संस्थया ........................ इति शीर्षकयुतस्य परियोजनायाः ..............इति मुख्यपरिशोधकरूपेण तथा ........................ इति सहपरिशोधकरूपेण भागग्रहणाय अभिनन्द्यते तथा अपरिहार्यकारणेन मुख्यपरिशोधकस्य विच्छित्तौ सहपरिशोधकः दायित्वं निर्वहति तथा एआईसीटीस्थं शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागं संसूच्य परियोजनां सफलतया समापयति इति।
2. यस्यां तिथौ संस्थायाः कृते एआईसीटीस्थेन शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागेन वित्तीयानुदानं प्राप्यते ततः प्रभृति परियोजनायाः तिथिः आरभ्यते।
3. संस्थायाः नियमैः अधिनियमैश्च मुख्यपरिशोधकः प्रशासितो भवति तथा परियोजनायाः समाप्तिं यावत् संस्थायाः प्राशासनिकनियन्त्रणे भवति।
4. एआईसीटीस्थस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागस्य वित्तीयानुदानस्य व्ययः परियोजनायाः स्वीकृतिपत्रे उल्लिखितरित्या निर्दिष्टावधौ परियोजनायाः कृते उपयुज्यते।
5. परियोजनायाः समाप्तेः परम् एआईसीटीस्थस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागस्य कृते प्राशासनिकदायित्वस्य अथवा अन्यविधदायित्वस्य सम्बद्धता न क्रियते।
6. संस्था अनुसन्धानपरियोजनायाः संपादनाय अन्वेषकस्य कृते अपेक्षितमूलभूतसौविध्यानि प्रददाति।
7. संस्थया उपर्युक्तपरियोजनायां निर्मिता सर्वा संपत्तिः लेखापुस्तकेषु उल्लिख्यते तथा तस्याः निर्यातनम् एआईसीटीस्थस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराविभागस्य विवेचनानुसारं भवति।
8. संस्था परियोजनायाः वित्तीयदायित्वम् अन्यप्रबन्धनदायित्वं च निर्वहति। इति

संस्थायाः मुद्रा
हस्ताक्षरम्
दिनाङ्कः - मुद्रया सह
संस्थाप्रमुखस्य